अवच्छेदकत्वलक्षणविवृत्तिः गादाधरीटीकायाम्

१५९१

अवच्छेदकत्वनिरुक्ति

॥ ॥श्रीगणेशाय नमः॥ दीधितौ नन्ववच्छेदकत्वमिति। स्वरूपसंबंधरूपावच्छेदकत्वं तत्र शक्यनिवेशनमित्युक्ताच संगतिः अनुमितिप्रतिबंधकतावच्छेदक
पर्याप्त्यर्थज्ञानविषयताश्रयत्वमित्यादिदोषादिलक्षणेषु तथाविधावच्छेदकतापानिवेशादित्यत इहेत्युक्तं अवच्छेदकत्वे स्वरूपसंबंधरूपत्वाभाव
साधने बाधः स्वरूपसंबंधरूपावच्छेदकत्वे एतल्लक्षणाघटकतोक्तोलक्षणाघटकत्वे तुष्करत्वालाभः सुकरत्वसंभावनावाप्यादत आह तथा चे
ति। केचित्तु दीधितौ नन्ववच्छेदकत्वमिति अवच्छेदकत्वपदप्रतिपाद्यं। नन्ववच्छेदकतात्वावच्छेदेन स्वरूपसंबंधरूपत्वाभावसाधने घटत्वादिनि
ष्ठावच्छेदकत्वे बाधः एवमेतल्लक्षणाघटकावच्छेदकतात्वावच्छेदेन तत्सिद्धेरुद्देश्यत्वेपि बाध एव तद्घटकहेतुतावच्छेदकतायां तथात्वासंभवात्।
न च तत्सामानाधिकरण्येन तत्सिद्धेरुद्देश्यत्वान्न दोष इति वाच्यं। तावन्मात्रहेतुतावच्छेदकतायामेव साध्यपर्यवसानसंभवेनार्थान्तरापत्तेः एतद्घ
टकप्रतियोगितावच्छेदकतासामान्ये स्वरूपसंबंधरूपावच्छेदकत्वाभावसाधने बाधाच्च। एवमनवच्छेदकत्वघटकावच्छेदकतात्वावच्छेदेन तत्सा
धनेपि बाध एव तद्घटकावच्छेदकतायां तथात्वासंभवात्। न च तत्सामानाधिकरण्येन तत्सिद्धेरुद्देश्यत्वेन बाध इति वाच्यं। तावन्मात्रापि तत्रैवार्था
न्तरादेर्दुर्वारत्वादिति चेन्न। अनवच्छेदकत्वप्रतियोग्यवच्छेदकतात्वावच्छेदेन तत्सिद्धेरुद्देश्यत्वे नोक्तदोषानवतारात्। एतत्साधकं हेतुं प्रद
र्शयति। व्यभिचारित्वापत्तिप्रसंगादिति। प्रकृतव्यभिचारिवृत्तिलक्षणावत्त्वादित्यर्थः। पक्षीभूतावच्छेदकतायां च तद्धत्त्वं च स्वाश्रयव्यभिचारिम
न्निष्ठाभावप्रतियोगितानिरूपितस्वरूपसंबंधरूपानवच्छेदकत्वव्द गुरुधर्मनिष्ठत्वसंबंधेनेति न वै यद्यधिकरणमिति प्राहुः। भट्टाचार्यास्तु

अव॰ छे॰
ग॰ टी॰

त्वीदृशापरंपरायाः संबंधत्वापत्तिभयेनावच्छेदकतायां स्वरूपसंबंधरूपायामेतल्लक्षणाघटकत्वं निराकुर्वतां दीधितिकृतां निरूप्यप्रतियोगिता न्त
निरूपितस्वरूपसंबंधरूपावच्छेदकत्वाभावघटितव्यापकत्ववत्साध्यसामानाधिकरण्यपर्यन्तत्वावच्छेदेन व्याप्तिभेदसाधनमेवाभिप्रेतं तथा
१ सत्येव सद्धेतत एव व्यभिचारिवृत्तित्वार्थकव्यभिचारित्वापत्तिव्याप्तिप्रसंगादित्यग्रिमग्रन्थसंगतेरित्याशयेन स्वरूपसंबंधरूपावच्छेदक
ताभावघटितं निरुक्तरूपमिति पक्षोत्कीर्तनं। स्वरूपसंबंधरूपावच्छेदकताभावघटितत्वं च साध्यतावच्छेदकनिष्ठाभावप्रतियोगि स्वरूप
संबंधरूपावच्छेदकत्वघटितत्वं तेन हेतुतादिनिरूपितस्वरूपसंबंधरूपावच्छेदकत्वाभावघटितस्य व्याप्तिभिन्नत्वेपि न क्षतिः। व्यभिचारि
वृत्तित्वसाधकं हेतुं प्रदर्शयति प्रमेयेति। तादृशेति स्वरूपसंबंधरूपेत्यर्थः। अत्र तादृशसामानाधिकरण्यावच्छिन्नहेतुविषयता अनुमिति
जनकतानवच्छेदिका प्रमेयत्वे सति व्यभिचारिवृत्तित्वादिति बोध्यं। तादृशेति गुरुरूपेत्यर्थः। घटितत्वं च गुर्वीत्यर्थः एकज्ञानविषयत्वमित्ये
के। साध्यतावच्छेदके तादृशावच्छेदकताभावः कुत इत्याकांक्षायां गुरुधर्मे निरुक्तप्रतियोगितानवच्छेदकत्वसाधकं प्रदर्शयति संभवती
ति। व्याप्तिसामान्यमुक्तौ संभवतीत्यत्र कस्मिंश्चिदित्याकांक्षादुर्वारेत्यतः तस्मिन्निति अवच्छेदकसंभवस्य गुरुत्वस्यावच्छेदकत्वाभावाप्रयोज राम॰
कत्वाद्याच्छे तादृशेति। वस्तुतः गुरौ तदभावादिति दीधितिकृत्प्रदर्शित एव गुरुधर्मे प्रतियोगितानवच्छेदकत्वसाधको हेतुः एवं च सामा १
न्याभावरूपहेतुना विशेषाभावसाधनमपि साधु संगच्छेते सामान्याभावसाधकस्यासंभवत्प्रतियोगितावच्छेदकधर्मापेक्षया गुरुत्वमिति

किं हेतुप्रयोगे तेति सारं। प्रतियोगितया इति। स्वव्यापकत्वे सति स्वनिरूपकाभावविरोधितावच्छेदकत्वमर्थः। प्रतियोगितान्यूनवृत्तेरेव तावच्छे
दकत्वात् जातिसामान्याभावे समवेतत्वं त्वतिरिक्तवृत्तेरपि स्वावच्छेदकं प्रतियोगिताया गुणादिसाधारणत्वासिद्धिर्वा सत्तात्वं तु नेति सत्ताभावसम
वेताभावयोर्भेद इति स्मर्तव्यं। न च त्र विरोधित्वं न प्रतिबंधकज्ञानविषयत्वं घटत्वादेः कंबुग्रीवादिमदभावप्रतियोगितावच्छेदकत्वानुप
पपत्तेः किं तु स्वनिरूपकाभाववन्निष्ठाधिकरणतानिरूपकतानवच्छेदकत्वं निरूपकता च प्रतियोगितावच्छेदकसंबंधेन तेन घटाभावव
ति कालिकादिसंबंधेन घटादेः सत्त्वेपि न क्षतिः एवं च सत्तात्वे सत्ताभावप्रतियोगितावच्छेदकत्वं न स्यात् सत्ताभाववत्समवेतत्वाप्रसिद्धेरि
ति चेन्न। स्वावच्छेदकसंबंधसामान्येन स्वनिरूपकाभाववदनुयोगिकत्व स्वव्यापकीभूतयादृशधर्मावच्छिन्नप्रतियोगिताकत्वोभयाभावः
तादृशत्वस्य तदर्थत्वात्। गगनत्वादेर्घटाभावसद्घटत्वादेश्च घटपटान्यतराभावस्य प्रतियोगितावच्छेदकत्ववारणाय यादृशधर्मे स्वव्या
पकत्वोपादानं। गगनाभावाभावश्च नातिकार्यः। रूपत्वादेर्व्याधिकरणसंबंधावच्छिन्नरूपाभावप्रतियोगितावच्छेदकत्वोपपत्तिः समवेतत्वमा
त्रस्य न जातिभेदप्रतियोगितावच्छेदकत्वं स्वनिरूपकभेदवद्गुणादिनिष्ठाधिकरणतानिरूपकतावच्छेदकत्वात् किंतु दलद्वयरूपजातित्व
स्यैवेत्यादिकमूह्यं। स्वावच्छिन्नेति स्वव्यापकत्वे सति स्वावच्छिन्नव्याप्यतावच्छेदकत्वस्य न समनैयत्यघटादार्थ्यतेति पाठः। न तु स्वसामानाधिक
रणपनिवेशान्न दोषः घटत्वादेर्घटप्रागभाववत्त्वसामानाधिकरण्यापादकतो जातित्वेति न तु स्वावच्छिन्नाधिकरणांशे न संबंधेन तदवच्छिन्नसमाना

अवच्छे
ग०टी०
२

धिकरणाभावप्रतियोगितासाध्यघटकप्रतियोगिताच प्रवेश्या प्रयोजनं सुगमं एवं च नायं दोष इति चेन् समवेताभावप्रतियोगितावच्छे-
दके सत्तात्वमपेक्ष्य गुरौ समवेतत्वे व्यभिचारात् । परिच स्वव्यापकत्वे सति स्वावच्छिन्नव्याप्यतावच्छेदकत्वमेवोच्यते तदा प्रमेयगगनतादि
साधारणपानुपपत्तिरिति । न तु प्रमेयधूमत्वमिति न तु धूमसमानाधिकरणाभावप्रतियोगितावच्छेदकमहानसीयवह्नित्वभिन्नत्वस्य व-
ह्नित्वे सत्त्वाद्व्याप्तिवारणाय तादृशप्रतियोगितावच्छेदकतापर्याप्त्याश्रयापर्याप्तविधेयतावच्छेदकताशालित्वं वाच्यं तथा च प्रमेय-
धूमत्वे तत्सत्त्वादतिव्याप्तिरिसाशयादवतारिकापाञ्चसंगतिरेवेति चेन्न । अवच्छेदकत्वाभावघटितलक्षणाभिप्रायेणानतसंगतेः
एकदेशादिवृत्तेर्व्यासज्यवृत्तिधर्मावच्छिन्नानुयोगिताकाभावांगीकारेणातिव्याप्तिदानं बोध्यं । गौरवं च पदार्थघटितत्वेन तत्तद्व्यक्तिवि-
र्मेस्म बुद्धिचित्संबंधस्येसाघूह्यं । ततः संयोगादीनामिति तद्व्यक्तित्वस्येव तद्व्यक्तेः स्वरूपत एवावच्छेदकत्वमित्युक्तावपि संबंधनिवं-
धनगौरवं दुर्वारमेव मूत्साधारणादिसंस्थाने च न वेजात्समभेदो मानाभावात् तेन न तज्जद्वटत्वानामवच्छेदकताप्रसक्तिः ॥ अनुगम- टाप.
करूपांतरसंस्थानविशेषवद्वृत्तित्वं गुणत्वन्यूनवृत्तित्वपदं सत्तावारणाय । न तु द्रव्याण्यास्यजातिमत्त्वेनैव साध्यतास्तु किं सा- २
मानाधिकरण्यसंबंधेन तादृशजातिविशिष्टगुणत्वेन साध्यत्वेनेत्यत आह तादृशेति । एवं तादृशविषयतास्वाश्रयत्वं जातिवि-
शेषणं एतेन पूर्वकल्पं विहायाथ वेत्यादिकल्पानुसरणेन स्वरूपतः इति । सामानाधिकरण्यसंबंधेनगंधत्वविशिष्टगुणत्वेन सा

ष्यतायामिति यावत्। उक्तरीत्या गंधत्वमात्रस्य लघुधर्मस्योपपन्नत्वादित्याशयः। किमर्थं इत्यस्य रसोऽपि वदतीत्यनेन सूचितः। यत्त्विति। रू
पवान् पृथिवीत्यादि। स्यादेव समवायेन रूपत्वप्रकारकप्रतीतिसामान्यभेदो नास्तीत्यतोऽवच्छेदकतावच्छेदकसंबंधेनेति। विषयितया रूप
त्वप्रकारकप्रतीतो न विषयितयावच्छेदकीभूतरूपत्वप्रकारकप्रतीतिभेदो यत्किंचित्साध्यतावच्छेदकप्रकारकप्रतीतौ तद्भेदोपादाने
धूमवान्वह्नेरित्यादौ समवायेन धूमत्वप्रकारकप्रतीतिभेदस्य कालिकेन धूमत्वप्रकारकप्रतीतौ सत्त्वादतिव्याप्तिरतः साध्यतावच्छेद
कताघटकेति। अवच्छेदकीभूतघटत्ववह्नित्वोभयावगाहिप्रतीतिभेदस्य वह्नित्वप्रकारकयत्किंचित्प्रतीतौ सत्त्वेनोपपत्तेर्नावच्छेदक
तासंबंधावच्छिन्नप्रकारतान्यसाध्यतावच्छेदकताघटकसंबंधावच्छिन्नप्रकारताप्रवेशः कृतः। निरूक्तेति। गुणत्वन्यूनवृत्तिघ्राणग्राह्य
जातिमद्रूपेत्यर्थः। साध्यतावच्छेदकप्रकारकप्रतीतित्वे प्रतियोगितावच्छेदकापर्यधर्माः तत्तत्प्रकारकप्रतीतिभेदैः प्रत्येकं सामानाधिकरण्येन तादृशभे
दकूटाधिकरणोकवृत्तित्वं वा उभयथापि घटत्वादिप्रकारकप्रतीतिभेदमादायातिव्याप्तेर्यद्येइतित्तत्रायं निरस्ततितथा सत्तीति। द्वितीयं शंकते अथेति प्र
मेयेति एतच्च यत्किंचित्प्रतियोगित्वस्य यत्किंचिदभावस्य वा निवेशे अन्यथाऽवच्छेदकाप्रसिद्धेः महानसीयत्वादीति। महानसीयत्वादिविशिष्टवह्नित्वे
त्वाश्रयाभावस्य त्वाद्यवा प्रतियोगितावच्छेदकं प्रति योगिविशेषणतापन्नमहानसीयत्ववह्नित्वोभयमिति पारिभाषिकावच्छेदकत्वं वा अन्यथात
त्र पूर्वपक्षानिराकरणेनैत द्विवचनाप्याप्रसंगसापत्तेस्तत्र दुर्घटमिति भावः। यत्किंचित्पदं च तादाहस्तसमानेति। एतेन धूमसाध्यकवत्प्रमेयस

अव.छे
ग.टी.
२

ध्यकेप्यतिव्याप्तिसंभवात्सविषयाणामेचित्वं प्रत्युक्तं। अत्र तर्कालंकारेणाभावप्रतियोगितासामान्यशून्यत्वाप्रसिद्धिभयेन तादृशप्रतियोगिताप्रति
योगिकाभावपरोयंकल्पो वाच्यः तत्र च प्रतियोगितायाः स्वरूपसंबंधानात्मकत्वेपि विशेषणयोजनासंभवात्स्वरूपसंबंधात्मकत्वप्रदर्शनमर्थकृ
प्रतियोगितांगीकारेपि तदुद्धारासंभवान्नानाप्रतियोगिवृत्तीत्युत्तरग्रंथविरोध इति दूषणमप्यं तादृशप्रतियोगितावृत्तितद्भिन्नत्वावच्छिन्नाभा
ववद्वृत्तित्वं तदन्यतिरिक्तवृत्तित्वं तद्भेदकूटं च निवेशयितुं तत्तत्पदमित्युक्तं तत्र प्रमेयाश्रयवान्धूमादित्यादौ तत्तत्पदार्थाभावप्रतियोगितावृ
त्तितद्भिन्नत्वावच्छिन्नाभाववद्वृत्तित्वस्य गगनत्वप्रमेयेसत्त्वाद्व्याप्तेः प्रमेयवान्प्रमेयत्वादित्यादौ प्रतियोगितैक्यपक्षेप्यतिव्याप्तिसंभवेन स्व
रूपसंबंधात्मकत्वानुधावनासंगतेश्च। अत्र यत्किंचिदेकाभावे साध्यप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वे साध्ये क्रमेण निवेशे यत्किं
चित्त्ववैयर्थ्यापत्तिरतः यत्किंचित्त्वं व्याप्यवृत्तिसाध्यकलक्षणपरं तत्र प्रतियोगिवैयधिकरण्याभावात् तथा च हेतुसमानाधिकरणयत्किंचिदभा
वप्रतियोगितासामान्यशून्यत्वाद्वृत्तित्वमर्थः। तत्र सर्वस्यैव वस्तुनोपावच्छिन्नाभावसत्त्वात्तत्प्रतियोगितासामान्यशून्यत्वाप्रसिद्धिरतो यत्किंचि
त्त्वनिवेशः। १ न तु निरुक्तौ एकपदवैयर्थ्यं तस्मात् व्याप्यवृत्तिसाध्यकस्थलीयनिरुक्ताभिप्रायकत्वं तस्यैकधर्मावच्छिन्नकत्वमर्थः तस्य प्रतियोगितायाम
न्वयः तथा च यादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणं हेतुमत् तादृशप्रतियोगितावच्छेदकधर्मावच्छिन्नप्रतियोगितासामान्यशून्या वृत्ति
त्वमिति निष्कर्षः। अत्र प्रथमनिरुक्तौ यत्किंचित्त्वानिवेशे सामान्याभावानुपगमेपि हेतुसमानाधिकरणाभावप्रतियोगितावच्छिन्नाभावाप्रसिद्ध्या
ऽतिव्याप्त्यभावात्तत्त्वे शेतद्धूमाभावमादायातिव्याप्तिरिति सामान्याभावसाधनोपष्टंभसंगतिः द्वितीयनिरुक्तौ चैकपदप्रवेशे सामान्याभावानुपगमे

रा.म.
२

पिपद्यपिपत्वप्रतियोगितावच्छेदकीभूततद्धूमत्वावच्छिन्नानधिकरणं हेतुमत्तत्प्रतियोगितात्वावच्छिन्नधूमान्तरवृत्तित्वस्य धूमत्वेऽसत्त्वात्तद्भिन्नगगनादि
भिन्नत्वेन धूमवान् वह्नेरित्यादावतिव्याप्तिरेवं तथाप्येकपदार्थनिवेशेन दर्शितार्थो वाच्यः तत्र वह्निमान् धूमादित्यादौ स्वत्वद्रव्यत्वादिरूपधर्ममुपादाय
तादृशप्रतियोगितासामान्यशब्दस्याप्रसिद्धिः अत एकधर्मावच्छिन्नेत्यत्र धर्मोपलक्षितत्वेन विशेष्यः तथा चातिव्याप्तिरेकपदार्थनिवेशेऽपि सामान्याभा
वं स्वीकृत्यैव वारयितुं शक्यते नान्यथा तथाहि वह्निमान् धूमादित्यादौ तद्द्रव्यात्मकप्रतियोगितावच्छेदकावच्छिन्नानधिकरणं हेतुमत्तद्द्रव्यात्म
कप्रतियोगितावच्छेदकावच्छिन्नानधिकरणं हेतुमत्तद्द्रव्यात्मकप्रतियोगितावच्छेदकवह्नित्वावच्छिन्नप्रतियोगितानुगमादव्याप्तिरतः सा
मान्याभावानुपगमे विशेषाभावप्रतियोगितास्ववसामान्यधर्मावच्छिन्नत्वस्वीकारात् यादृशप्रतियोगितात्वावच्छिन्नावच्छेद्यताकत्वं तादृश
प्रतियोगितावच्छिन्नावच्छेद्यताकत्वविवक्षायामपि तद्वारणं तद्वारणाय व्यासज्यवृत्त्यनुयोगिताकत्वविशिष्टप्रतियोगितात्वमेव यादृश
तादृशप्रतियोगितात्वेन विवक्षणीयं एवं चातिव्याप्तिवारणं सामान्याभावस्वीकारे तो वतथाविधप्रतियोगितात्वावच्छिन्नावच्छेद्यताक
त्वस्य धूमत्वे दुरूपपादत्वादिति तर्कालंकारसंदर्भाशयः तत्र सामान्याभावोपगमे द्वितीयनिरुक्तेः वह्निमान् धूमादित्यादौ प्रतियोग्यभावोभयत्व
रूपप्रतियोगितामते तद्द्रव्यात्मकप्रतियोगितावच्छेदकावच्छिन्नानधिकरणं हेतुमत्वह्निसामान्याभावात्मकतद्द्रव्यात्मकप्रतियोगिताव
च्छेदकवह्नित्वावच्छिन्नप्रतियोगितानुपगमे नाव्याप्तिरतः यादृशप्रतियोगितात्वावच्छिन्नावच्छेदकताकत्वं तादृशप्रतियोगितात्वावच्छिन्नाव

अवच्छे
ग॰टी॰
४

छेदकताकत्वं च विवक्षणीयं तद्वृत्त्यभावतद्वृत्त्युभयात्मकप्रतियोगितात्वावच्छिन्नावच्छेदकताकत्वं च न वह्नित्वस्येति वाच्यं एवं च व्यामेरेकार्थ
तानिर्वाहाय हेतुमन्निष्ठभेदप्रतियोगितावच्छेदकतावच्छेदकावच्छिन्नप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगितासामान्यशून्यत्वघटितप
र्यवसानस्यावश्यकतया तत्रप्रतियोगितायां यत्किंचिदभावीयत्वस्यार्थकमेकपदवैयर्थ्यं चतुर्वारं। प्रतियोगिवैयधिकरण्यघटकघटकावच्छेद
कत्वघटिततन्निरुक्तेर्भिन्नाभिन्नावच्छेदकत्वपदार्थगर्भनिरुक्तिमध्यप्रवेशानौचित्यं चातः धर्मे लाघवाद्धेतुमद्भिन्नभेदप्रतियोगितावच्छेदक
तावच्छेदकत्वं निवेश्य तदवच्छिन्नप्रतियोगितायां यत्किंचिदभावीयत्वं निवेश्यं तादृशार्थस्य स्वावच्छेदकावच्छिन्नवत्तासंबंधेन हेतुमन्निष्ठभेदप्र
तियोगितावच्छेदकत्वरूपप्रतियोगिताविशेषणासिद्धस्य प्रतियोगिवैयधिकरण्यपदलभ्यतैव न त्वेकपदलभ्यतेत्याशयेनाह प्रतियोग्यनधिक
रणेति। एकत्रेति तथा च तत्तदभावप्रतियोगितासामान्यशून्यावृत्तित्वं गगन एवेत्यतिव्याप्तिः। स्वव्यापकतत्तदभावप्रतियोगितात्वरूपमित्युक्तौ
चाप्रसिद्धिः स्यात्। पूर्वोक्तदोषः समवायेन प्रमेयसामान्यसाध्यकातिव्याप्तिरूपः। यादृशधर्मेति। यद्यपि यद्धर्मावच्छिन्नत्वेत्यपि सुवचं तथाप्यनु
गतधर्मस्यापि लाभाय तथोक्तमिति मंतव्यं अतिरिक्तसामान्याभावानुपगमे यत्किंचिदेकाभावप्रतियोगितासामान्यानतिरिक्तवृत्तित्वरूपतादृशाव राम॰ ४
च्छेदकत्वं धूमत्वादौ नोपपादयितुं शक्यमित्युपष्टंभहंगतिं यत्किंचिदेकाभावस्थाने प्रतियोगितायां यत्किंचिदेकधर्मावच्छिन्नत्वं निवेश्य स्वयं दू
षयति इदमापातत इति स्वव्यापकतावच्छेदकीभूततादृशयत्किंचिदेकाभावीययत्किंचिदेकधर्मावच्छिन्नप्रतियोगितात्वकत्वनिवेशेऽतिव्या

प्तिरतः एकाभावपरित्यागः। ननु हेत्वधिकरणवृत्त्यभावीययत्किंचिदेकधर्मावच्छिन्नप्रतियोगितासामान्यानतिरिक्तत्वनिवेशो यावद्वह्न्यभावानां
हेतुसमानाधिकरणतयाऽव्याप्तिरत आह हेत्विति। विशेषाभावे हेत्वधिकरणवृत्तित्वावच्छेदेन वह्नित्वावच्छिन्नत्वाश्रयप्रतियोगिताक
त्वादुक्तं विशिष्टेति। अयोगोलकवृत्तित्वावच्छिन्ने धूमत्वावच्छिन्नत्वविशिष्टप्रतियोगिताकत्वाज्ञानादित्याप्तिः। पर्यन्तानिवेशेऽपीत्यपिना निष्प्रयो
जनतत्पर्यन्तनिवेशपक्षसमुच्चयः। जगदीशेन स्वरूपसंबंधरूपावच्छेदकत्वनिवेशेऽपि न क्षतिः साध्यतावच्छेदके सावच्छेद्यप्रतियोगिताक
त्वनिवेशे न गुरुधर्मावच्छिन्नसाध्यकाव्याप्तिर्मुदासादित्यभिहितं तत्र एवंत्वविशिष्टेत्यादिनाऽवच्छेद्यत्वघटितलक्षणपरिष्कारस्याति जिज्ञासि
ताभिधानात्पङ्क्तिर्विशेषणानां नरपूरणं च दोष इत्यतः स्वयमवतारयति प्रतियोगितेति। अत्र जगदीशेनोक्तं प्रतियोगितावच्छेदकानतिरिक्तवृत्ति
भिन्नभिन्नत्वन्नकरद्वया प्रवेशे लाघवाद्धेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकाभाववद्वृत्तियत्साध्यतावच्छेदकं तदवच्छिन्नसामाना
धिकरण्यं व्याप्तिः। नन्वत्र वह्निमान् धूमादित्यादावव्याप्तिः हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकेषु तत्तात्मतारों। भयत्वं तदभाववति वह्नित्वस्याप्र
वृत्तेः। प्रत्येकं तदभावोपगमे तु वह्निधूमोभयवान् वह्नेरित्यादावतिव्याप्तिः हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकं यद्वह्निधूमोभयत्वं तदभाववति
प्रत्येकस्मिन् उभयत्वस्य वृत्तेः। न च साध्यतावच्छेदके तदभावाधिकरणतावच्छेदकत्वं निवेश्यं तेन वह्निमान् धूमादित्यादौ तदुभयत्वाभावाधिक
रणतावच्छेदकत्वस्य वह्नित्वे सत्त्वाद्वह्निधूमोभयत्वे चासत्त्वान्नाव्याप्त्यतिव्याप्ती इति वाच्यं हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकीभूतमहानसी

अवछे
ग॰टी॰
५
5

यद्वह्नित्वाभावाधिकरणतावच्छेदकत्वस्य वह्नित्वे सत्त्वेनाव्याप्तेर्महानसीयवह्न्यभावेपि वह्नित्वसत्त्वात् व्याप्यवृत्तेरवच्छेदकत्वाभावाच्च। अत्र
वदंति। प्रतियोगितावच्छेदकातिरिक्तवृत्तित्वं स्वपर्याप्त्यनवच्छेदकधर्मावच्छिन्नपर्याप्तिकत्वं तेन नार्णतात्वोभयत्वपर्याप्त्यनवच्छेदकं
यद्वह्नित्वादि तदवच्छेदेन वह्नित्वस्य पर्याप्तत्वान्नाव्याप्तिः। न च तद्रूपवान् पृथिवीत्वादित्यादौ विषयितया प्रतियोगितावच्छेदकीभूतरूपत्वादेः स्व
पर्याप्त्यनवच्छेदकधर्मावच्छिन्नापर्याप्तत्वादव्याप्तिः साध्यतावच्छेदकतावघटकसंबंधेन तादृशप्रतियोगितावच्छेदकत्वोक्तावपि साध्यताव
च्छेदकतानि रूपितसमवायेन साध्यतावच्छेदकत्वस्थले तादृशसंबंधेनावच्छेदकाप्रसिद्धेरव्याप्तिरिति चेत्तर्हि प्रतियोगितावच्छेदकावच्छिन्ना
भाववन्निष्ठाधिकरणतावच्छेदकत्वं प्रतियोगितानतिरिक्तत्वमिति न कोपि दोषः तत्रास्तातावान् जातेरित्यादौ तादृशविशिष्टसत्तात्वमादाया
व्याप्यसत्त्वाद्वस्तुतस्त्वित्यादिकस्यावश्यानापत्तेः। स्वसमानेति। समवायेन प्रमेयसाध्यकस्थले दोषवारणाय यथाश्रुतानतिरिक्तवृत्तित्वस्या
गः। अत्र स्वसमानाधिकरणसंतताभावप्रतियोगित्वं न युक्तं सर्वस्यापि तादृशोभयाभावादिप्रतियोगित्वात् तन्नापि तादृशप्रतियोगितानवच्छेद
कधर्मवत्त्वं घटत्वादेरपि तादृशजातित्वादिमत्त्वेन वह्नित्वादेरवच्छेदकत्वप्रसंगात्। यत्तु हेतुमद्दसभावप्रतियोगितावच्छेदकतापद्धर्मव्यापकता राम॰ ५
वच्छेदिकातद्भिन्नत्वमिति तन्न। तद्वह्नित्वादिसाधारणतादृशप्रतियोगितावच्छेदकतायावह्नित्वादिव्यापकतावच्छेदकत्वेनाव्याप्तेः। प्रतियोगिता
प्रतियोग्यभाववद्वृत्तेति जगदीशमतस्यापसिद्धांतकवलिततादाह सामान्याभावेति संबंधसामान्येन धूमत्वादिकं प्रतीति। कालिकसंबंधेन धूमत्व

वत्तिसंदेधूमादिभेदसत्त्वात्। ननु वह्निसमानाधिकरणाभावप्रतियोगितानवच्छेदकधूमत्वायोगोलकावृत्तित्वादीनां संबंधसामान्येनायोगोलकावृत्तित्वा
दिकं प्रत्यव्यापकतया स्वव्यापकतादृशप्रतियोगितावच्छेदकाप्रसिद्धेरव्याप्तिः। न च तादृशप्रतियोगितावच्छेदकीभूतायोगोलकान्यवृ
त्तित्वविशिष्टसत्तात्वस्य संबंधसामान्येनायोगोलकावृत्तित्वाधिकरणसंपदादिनिष्ठान्योन्याभावप्रतियोगिताः गुरुसत्तात्वापेक्षया गुरुत्वेनानवच्छेदक
त्वादवच्छेदकाप्रसिद्धिरिति वाच्यं। तथा च स्वपदेन धूमत्वमुपादाय प्रकृतीयास्वव्यापकत्वस्यायोगोलकान्यवृत्तित्वविशिष्टसत्तात्वेनोपपादयितुमश
क्यतया संबंधसामान्येन स्वव्यापकतत्कत्वनिवेशेऽप्यदोषात्। यत्तु न स्वाद्यपदोपादाय स्वन्यूनवृत्तितदवच्छेदकसामान्यकत्वरूपानवच्छेदकत्वस्य
साध्यतावच्छेदके निवेशेनातिव्याप्तिसंगमनं तन्न तथा सत्यन्यवृत्तमन्यद्धान्तमिति न्यायपातादिति चेन्न। स्वव्यापकस्वसमानाधिकरणतत्क
त्वस्य वाच्यत्वात् अन्यथा सिद्धान्तपक्षेपि द्रव्यं पृथिवीत्वादित्यादौ पृथिवीत्वादिसमानाधिकरणाभावीयप्रतियोगितावच्छेदकस्य द्रव्यान्यवृत्तित्व
विशिष्टसत्तात्वस्य द्रव्यत्वत्वसमानाधिकरणभेदप्रतियोगितायां गुरुसत्तात्वमपेक्ष्य गुरुतया अनवच्छेदकत्वाद्व्याप्तिः स्यात् तथा च धूमवान् वह्नेरि
त्यादौ स्वपदाभ्यासयोगोलकान्यवृत्तित्वविशिष्टसत्तात्वमुपादाय तत्समानाधिकरणस्य संबंधसामान्येन तद्व्यापकस्य वह्निसमानाधिकरणाभा
वप्रतियोगितावच्छेदकस्यासंभवादतिव्याप्तिरिति। जातिमान् प्रमेयवान् वह्नेरित्यादावयोगोलकान्यत्वविशिष्टसत्तात्वस्य तादृशतया ऽव्याप्तिरस्त्वहस्त
वीजमेवेति। यत्तु प्रकृतव्याप्यवह्नितत्पूर्वक्षणवृत्तिसंयोगत्वादिकं तादृशप्रतियोगितावच्छेदकं तदनतिरिक्तवृत्तितदेवेति नावच्छेदकाप्रसिद्धिरिति

अवच्छे. ग. टी.
६
6

तन्न तत्सर्वस्याणोस्पन्दक्रियाध्वंसेनास्य कालिकसंबंधेन सत्त्वात्। कालिकसंबंधेन तादृशप्रतियोगितावच्छेदकस्य संबंधसामान्येन स्वाधिकरणनिष्ठ
भेदप्रतियोगितायाः कालिकसंबंधेनानवच्छेदकत्वात्तत्र सिद्धिर्वा। वह्निमान्धूमादित्यादाववच्छेदकत्वप्रसिद्ध्यर्थं स्वाधिकरणताया एवोपादानादि
ति। प्रतियोगितावच्छेदकताघटकेति। ननु साध्यतावच्छेदकताघटकसंबंधेनैव व्यापकताप्रवेशात्। न च धूमत्वप्रकारकप्रमाविशेष्यवान्वह्नेरित्या
दौ साध्याभावप्रतियोगितावच्छेदकस्य लघुनो धूमत्वस्य तादृशसंबंधेन व्यापकत्वादतिव्याप्तिरिति वाच्यं। अयोगोलावृत्त्यभावमादायादोषात्। लघुध
र्मितराभावेन तादृशेन स्वरूपसंबंधेनायोगोलकावृत्तित्वस्यैव व्यापकत्वात्। न च धूमत्वप्रकारकप्रमाविशेष्यतीयस्वरूपसंबंधेन तादृशविशेष्यता
विशिष्टधूमे साध्येऽगतमाप्तिरेवमपि दुर्वारेति वाच्यं। विशेषरूपेणानुगतानुपगमादिति चेन्न। विषयतासंबंधेन धूमत्वप्रकारकप्रमावत्तो धूमस्य सा
ध्यतायामतिव्याप्तेः हेतुसमानाधिकरणाभावो विशेष्यतासंबंधेनायोगोलकावृत्तित्वप्रकारकप्रमाविशिष्टाभावः तत्प्रतियोगितावच्छेदकस्य ल
घुनोऽयोगोलकावृत्तित्वस्य विषयतासंबंधेनाभाववति धूमे साध्यतावच्छेदकताघटकीभूतविषयतासंबंधेन तादृशप्रमारूपसाध्यतावच्छेद
कस्य सत्त्वात्। न चैवमपि अयोगोलकावृत्तित्वादेर्विषयतासंबंधेनाधिकरणाप्रसिद्ध्या स्वव्यापकत्वमेवेति वाच्यं। तथा सति वह्नित्वप्रमावतः साध्य
त्वेऽव्याप्तेः घटत्वादेरुक्तरीत्या साध्यतावच्छेदकीभूततादृशप्रमाव्यापकताया अक्षतत्वादतः प्रतियोगितावच्छेदकताघटकसंबंधनिवेशः पारिभा रामः
षिकावच्छेदकभेदकूटनिवेशस्योक्तरीत्यानुगतस्य स्वव्यापकसत्त्वनिष्ठावच्छेदकत्वसामान्याभावनिवेशस्य वा धूमवान्वह्नेरित्यादौ फलं द्रष्टव्यं। ६

।दंडादिसाध्यकव्यभिचारित्वापत्तिप्रसंगभ्रमं वारयति दंडिमानिति।न च स्वपर्याप्त्यवच्छेदकतापर्याप्त्यनाश्रयत्वरूपपारिभाषिकभेदस्य निवेशा
त्तत्ताविशिष्टदंडपर्याप्त्यवच्छेदकतापर्याप्त्यनाश्रयत्वस्य दंडत्वविशिष्टे सत्त्वात् कथं नातिव्याप्तिरिति वाच्यं वह्नित्वेन महानसीयत्वविशिष्टवह्नित्व
भेदासत्त्वेनाव्याप्तिवारणाय पारिभाषिकभेदो न निवेश्यते किंतु साध्यतावच्छेदकवत्तापर्याप्तपारिभाषिकावच्छेदकाधिकरणताभेदः वह्नित्ववत्ता
यां विशिष्टवह्नित्वाधिकरणताभेदस्य सत्त्वान्न दोषः प्रकृते दंडत्वविशिष्टवत्तायां तत्ताविशिष्टदंडाधिकरणतानन्यतया नातिव्याप्तिः पारिभाषिकाव
च्छेदकभेदनिवेशेप्युक्ततत्तायामुपलक्षणतयैव निवेशात्स्वपदेन यो धर्मो धृतः प्रकृते दंड एव न तु तत्तावद्दंडः स्वरूपतो निवेशान्न हि तया तत्तो
पलक्षितत्वेन भेदाधिकरणो निवेशोपि स्वपदेन तद्विशेषितदंडस्यैव धर्तुमशक्यत्वात्।तथा च तत्पर्याप्तावच्छेदकतायामप्रसिद्ध्या नातिव्याप्तिरि
त्याशयात्।हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकं यादृशं रूपं स्वव्यापकमित्यत्र दंडाभावस्य हेतुमद्वृत्तित्वसंभवाद्यादृशं रूपं दंडत्ववि
शिष्टमेव तस्य च स्वपदेन दंडत्वविशिष्टस्योपादाने न व्यापकत्वान्नातिव्याप्तिरिति तु तत्तद्दंडदौ तत्तद्दंडात्मादिपंक्तिसंक्लेशप्रदं।दंडाद्यवच्छिन्न
साध्यकसद्धेताविति पंक्तिसंगतिश्चात्तत्ताविशिष्टदंडगतत्मकरूपस्य दंडत्वविशिष्टात्मकस्याव्यापकतया व्याप्त्यसत्त्वेन परंपरासंबंधेन साध्यस
माधानासंगतेः।दंडो द्विलाभाववत्त्वाविति प्रसंगेप्येवं पत्रिमाहद्विलादीति।वह्निघटोभयवानिति।अयमव्यभिचारिनिरूपकाधिकरणाद्वृत्तित्वस
साध्यतावच्छेदकाव्यापकत्वेपि तादृशाधिकरणानवच्छेदकत्वविशिष्टस्य तत्तयान्याव्यापकत्वसंभवात् प्रतियोगितावच्छेदकरायप्रवेशो व्य

अव छे.
ग. टी.
७
7

र्थ इति चेन्न। तादृशानवच्छेदकत्वविशिष्टस्य तत एवात्यंताभावप्रतियोगितानवच्छेदकत्वात् विशेष्यवृत्तेरिति न्यायेन तादृशानवच्छेदकत्व
विशिष्टस्य तद्व्यापकतायां दुरुपपादत्वात्। न च तादृशानवच्छेदकत्वविशिष्टधर्मावच्छिन्नाभावप्रतियोगितायाः स्वरूपादिसाधारणतया तद्व्या
पकत्वस्य घटपटोभयत्वादावसत्त्वेन कथं तस्य लघुधर्मत्वेति वाच्यं। तथापि तादृशानवच्छेदकधर्मसमनियततयावत्त्वावच्छिन्नसाध्यक एवा
तिव्याप्तेः। नञ्पदेनेति। स्वरसतो यादृशाद्वादिति न्यायात्। स्वपदं समानवृत्तिकत्वनिवेशं त्वंऽपति। व्यापकताशरीरे इति। प्रतियोगितान्यधिकर
णा इति स्वसमानाधिकरणभेदप्रतियोगितावच्छेदकीभूतभेदीयप्रतियोगितानवच्छेदक इति निष्कर्षः। स्थलांतरे प्रतियोगिवैयधिकरण्यनि
वेशफलं तत्कृते न चेति अत्र व्यासज्यवृत्तित्वतद्वद्भ्यत्वान्यतररूपेणैव समानवृत्तिकत्वमिति जगदीशेनोक्तं तत्र व्यासज्यवृत्तित्वतद्वन्यत्वान्यत
रावच्छिन्नाधेयतात्वरूपेण स्वनिष्ठाधेयतासमानाधेयताशालित्वं न युक्तं तादृशतादृशदहनोभयत्वनिष्ठाधेयतायावह्नित्वनिष्ठाधेयतया व्यास
ज्यवृत्तित्वतद्वद्भ्यत्वान्यतरावच्छिन्नाधेयतात्वेन तुल्यत्वादुक्तदोषावारणात् किंतु व्यासज्यवृत्तितावच्छिन्नस्वनिष्ठाधेयतासमानाधेयतत्वाव्या
सज्यवृत्तितावच्छिन्नस्वनिष्ठाधेयतासमानाधेयतान्यतरवत्त्वं तत्पदार्थविशेषणं तन्न च वृद्धगौरवमित्यत आह स्वनिष्ठेति। घटत्वं दृष्टांतः। व
ह्नित्वेति अतिप्रसंगोद्धारार्थं व्यासज्येति। व्यासज्यवृत्तेरव्यासज्यवृत्तेश्च स्वस्वसमानजातीयवृत्तिकधर्मावच्छिन्नापर्याप्तिरित्यर्थः। आद्ये द्वित्वादिः
अंत्ये एकत्वं तादृशधर्मः। अव्यासज्यवृत्ति वह्नित्वादीनां व्यासज्यवृत्तिधर्मप्रतियोगिकपर्याप्त्यवच्छेदकत्वं स्वीकार्यं अन्यथा वह्नीति प्रत्ययानु

राम.
७

दपर्याप्तेरित्तिवद्वित्वमादायैवोभयत्वादेस्तत्समानवृत्तिकत्वं दुर्वारमित्याशंकते अथेति। अव्यासज्यवृत्तिधर्मपर्याप्त्यवच्छेदकमेकत्वमेव न
त्वनेकवृत्ति व्यासज्यवृत्तिधर्म इति नाव्याप्तिरिति शंकते न चेति। किं [illegible] त्विति तथा चैकत्वमेव द्वित्वादिपर्याप्त्यवच्छेदकमित्यर्थः। घटो
द्रव्यमिति व्यापकधर्मप्रतियोगिकपर्याप्तेर्व्याप्यधर्मावच्छिन्नत्वात् तथा च घटत्वादिप्रतियोगिकपर्याप्तौ द्रव्यत्वादिप्रतियोगिकपर्याप्त्यभेदा
त् घटत्वावच्छिन्नत्वमिष्टम् अव्याप्तिर्दुर्वारेति भावः। यद्यपि घटो घट इति प्रतीतेरपि घटत्वप्रतियोगिकघटत्वावच्छिन्नपर्याप्तिसाधनं संभवति
तथापि अव्यासज्यवृत्त्येकधर्मे निष्ठधर्मितावच्छेदकप्रकाराभावापन्नग्रहे पर्याप्तिर्न भासते इमौ द्वाविति प्रत्यये तु सा भासत इति यदिरूपान्न
दायास इति तन्नोक्तं पर्याप्तेरतिप्रसक्तधर्मानवच्छेद्यत्वाद्द्रव्यं घट इति नोक्तं। तथा विधेति अव्यासज्यवृत्तीत्यर्थः। द्वित्वपर्याप्तेर्घटत्वावच्छिन्न
त्वं तद्व्यक्तित्वावच्छिन्नमेव घटत्वप्रतियोगिकपर्याप्तेस्तत्त्वाभावात् सकलघटवृत्तिघटत्वादिप्रतियोगिकपर्याप्त्यंतरे मानाभावादित्यपरामस
माधत्ते अनेकेति। यद्वा घटो द्रव्यमिति दिङ्मात्रं द्रव्यत्वप्रतियोगिकघटत्वावच्छिन्नातिरिक्तपर्याप्तिपरं तद्बलेन च घटत्वावच्छिन्नघटत्वप्रतियो
गिकपर्याप्त्यंतरसाधनं पूर्वपक्षेऽभिमतं तत्समाधाने द्रव्यत्वघटत्वपर्याप्तिभेदेऽपि न क्षतिः। इदमेकं द्रव्यं घटो द्रव्यमिति प्रतीत्योरैक्ये वा द्वितीये द्रव्यत्वप्रति
योगिकतद्घटत्वावच्छिन्नपर्याप्तिरूपस्यैवानुगतरूपेणाघटत्वावच्छिन्नत्वात्। एवमयमेको घटः घटो घट इत्यादौ घटत्वपर्याप्तेरप्यूह्यं। नन्वेवमपि
द्रव्यत्वद्वित्वपर्याप्तेरेकतया तदवच्छेदकं यद्द्वित्वादि तदवच्छिन्नपर्याप्तिकयावत्संभवस्यैवेत्यव्याप्तिर्दुरुद्धरैवेत्यत आह एवं चेति। एकमात्र

अवच्छे.
गा.टी.
८

वृत्तित्वं उभयावृत्तित्वं नन्वेवमपि एकमात्रवृत्तिधर्मावच्छिन्नावह्नित्वपर्याप्तिः तस्मात्मेवद्रव्यत्वपर्याप्तित्वानुरोधेनानेकवृत्तिधर्मावच्छेद्यतासं
भवात् कथं दोषोद्धारः इति मेवं त्वप्रतियोगिकपर्याप्ति वृत्ति एकमात्रवृत्तिधर्मावच्छिन्नावच्छेद्यताकत्वविवक्षणात्। उभयावृत्तिधर्मस्य तत्तद्व्यक्ति
त्वमेव। एवं च वह्नित्वप्रतियोगिकपर्याप्तेर्वह्नित्वावच्छेद्यतायामनतिरिक्तपर्याप्तित्वमवच्छेदकं किं त्वनुगतरूपमेवेति न कश्चिद्दोषः॥ अस्मास्वस्व
न्नीति विशेषणं त्वपर्याप्त्यवच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्त्यवच्छेदकताकत्वरूपविशेषणासूचकं वा॥ अयमेको हेतुरिति दीधितिखंड
यति अत्राकृतिस्मादिना। लक्षणं परिष्कृत्ते तथा चेति न चाव्याप्त्यस्य वृत्तिघटत्वादीनां संबंधस्य व्याप्यवृत्तितामावादधिकरणतावच्छेदक
दुर्भिक्षं स्वाधिकरणतानवच्छेदकानवच्छिन्नाधिकरणताकत्वस्य तदर्थत्वात्। अवच्छेदकतासंबंधावच्छिन्नस्वाधिकरणत्वाभावं प्रवेश्य धूमवान्
वह्नेरित्यादौ त्वपदे न धूमत्वादेरुपादानात् एकजातीयं वा व्याप्यव्याप्यवृत्त्यधिकरणतावच्छेदकत्वं वस्तुतस्तु तथा चेति पाठः ओलित एवाद्रव्ये
इति द्रव्यत्वेहित्वावच्छेदकत्वं बोधयितुं द्विवचनं तत्रैव वृत्तित्वावच्छेदकत्वं दर्शयितुं द्रव्याणीति वहुवचनं इत्थं प्रयोगश्चेदां किंचिद्रूपं द्रव्यद्वयप
र्याप्तित्वादि पूर्वविवक्षया एकधर्मावच्छिन्नत्वविवक्षया न समानेति। अस्त्वं तामावयद्रिता न्यूनवृत्तित्वं तु प्रतियोगितैव पक्षिकरणतानिवेशे किमे
तस्याव्याप्यवृत्तितायाः सर्वतंमततयाः संगतमितिनिसागः। यद्धर्मान्यूनवृत्तित्वपत्संबंधावच्छिन्नत्वाभावनिवेशाशंकानिरासाय प्रतियोगितायाः इ
तिजातिमत्त्वामावाभावप्रतियोगितावच्छेदकं लाघवात्तत्रैवेत्यतो घटो वृत्तीति। न च घटादिवृत्तिजातिमत्त्वसमनियतमेवेति सद्धंभं तत्प्रतियोगि

गाम.
८

ताकाभाववद्वृत्तितावच्छेदकं न भवतीति वाच्यं। तत्र कपालसमवेतावृत्तिजातिमदभावस्योक्तत्वात् तथा च निरुक्तधूमव्यापकतावच्छेदकत्वस्य
घटावृत्तिजातित्वेऽसत्त्वात्तद्विशिष्टावच्छेद्यत्वप्रसिद्धिरिति भावः। तद्दूसम्मतस्येति रूपवान् पृथिवीत्वादित्यादौ रूपत्वव्यापकं यद्रूपत्वं तदवच्छे
द्यत्वस्य विषयितया रूपत्वविशिष्टाभावप्रतियोगितायां सत्त्वादव्याप्तिः। ततः व्यापकतावच्छेद्यत्वयोरैकसंबंधावच्छिन्नत्वे देयं। कालः सर्ववानि
त्यादौ तादात्म्येन साध्यत्वे गगनादेः कालिकसंबंधेन वृत्तित्वात्तेन संबंधेन साध्यनिष्ठभेदप्रतियोगितावच्छेदकाप्रसिद्धावपि समवायादिना स्व
व्यापकस्य कालपरिमाणादेः प्रसिद्धेर्लक्षणसमन्वयः साध्यतावच्छेदकस्यापि स्वव्यापकत्वोपपादनायाह स्व—वेति। गुरुधर्मस्य साध्यता
वच्छेदकतायां स्वे साध्यनिष्ठभेदप्रतियोगितावच्छेदकत्वस्य गुरुतयाऽभावप्रतियोगितावच्छेदकतया निवेशासंभवात्प्रतियोगितामक्तयो विशि
ष्योपादेया इति गौरवादेतत्कल्पस्यानुरोध इति तु न वाच्यं। वह्निमान् धूमादित्यादौ वह्नित्वसमानाधिकरणतत्तद्वह्निभेदमादायाव्याप्तिवारणायैतत्
त्काल्ये प्रतियोगितासामान्यनिवेशेन तत्र च प्रतियोगितानां विशिष्यनिवेशे नातिगौरवात्। इदं तु बोध्यं उभयत्वादेः साध्यतावच्छेदकत्वे तदव
च्छिन्नभेदस्य तत्समानाधिकरणतायाः सर्वैः सम्मततया तस्येतत्कल्पेऽपि प्रतियोगपदवृत्तित्वनिवेशं विना स्वव्यापकत्वं नास्तीति व्यभिचारनिरूपक
रणा वृत्तित्वस्य तथात्वमेतत्कल्पे आवश्यकं एवं च पूर्वकल्प एव सम्यक् लघुत्वादिति। यद्वा साध्यतावच्छेदकत्वनिष्ठत्वं निरवच्छिन्नं निवेश्यं। ननु घट
त्वादेः कालिकसंबंधेन स्वव्यापकतादव्याप्तिरत आह स्वावच्छेदकतयोरिति। यावद्धर्मावच्छिन्ना व्यभिचारिता न धूमत्वविशिष्टस्य तद्धूमतावच्छिन्नस्य

अवछे.
ग.टी.
९

भिचारादतो पर्यन्तं किंचिदित्रि। पर्याप्तीति। अन्यथा महानसीयवन्ह्याद्यभावप्रतियोगितावच्छेदकवह्नित्वादिकमादायाव्याप्तेः। प्रतियोग्यनधिक
रणेति तदवच्छिन्नाभावो वक्तव्यो वाह धूमाद्यभावस्यापीति। गुणादेरेव संयोगेनाभावस्येत्यपि योजना एवकारेण धूमाद्यभावनिरासः। लाघवा
दाह तद्धर्मावच्छिन्नानधिकरणेति साध्यतावच्छेदकीभूतसंयोगे घटत्वावच्छिन्नप्रतियोगिकत्वरूपतदनुयोगिकत्वोभयाभावसत्त्वाद्वह्नित्ववि
शिष्टस्य ह्रदासंबद्धत्वादव्याप्तिरतो यद्यदिति विश्यातथा च पर्वताद्यनुयोगिकत्वघटितोभयाभावसत्त्वात्तस्य तदसंबद्धत्वाभावेन नाव्याप्तिः। यद्य
दधिकरणे साध्यतावच्छेदकसंबंधानुयोगित्वदानेन गुणादेर्व्युदासात्तान्तदधिकरणवृत्तित्वोक्तावपि दोषोद्धारसंभवादाह कपालादाविति
। तथापीति घटत्वाद्यवच्छिन्नाभाववत्पर्वताद्यनुयोगिकसंबंधे वह्नित्वविशिष्टप्रतियोगिकत्वादतः सामान्यपदं। ननु विशिष्टसत्तावान् जाते
रित्यादौ समवायेन पक्षे विशिष्टसत्तात्वावच्छिन्नाभाववदनुयोगिकसमवायस्य विशिष्टसत्तात्वविशिष्टप्रतियोगिकतया गगनत्वादिवि
शिष्टप्रतियोगिकत्वाभावादतिव्याप्तिरेवातस्तदवच्छिन्नाभाववन्निष्ठसाध्यतावच्छेदकसंबंधानुयोगितासामान्ये तद्विशिष्टप्रतियोगिकत्ववि
शिष्टसंबंधानिरूपितत्वनिवेशो च गौरवमतश्चाह तदवच्छिन्नेति। तादृशासंबंधप्रतियोगितावच्छेदकापर्याप्तविषयतायान निवेशः गुणान्य राम.
त्वादिसहितसत्तात्वपर्याप्तविषयतायाः तथाविधसत्तात्वपर्याप्तत्वादतः प्रथमपर्याप्तिनिवेशः। तत्पर्याप्त्यवच्छेदकावच्छिन्नपर्याप्तत्वलाभार्थं ९
। अत्रैव द्वितीयपर्याप्तिनिवेशफलं बोध्यं। तादृशमहानसीयवह्नित्वादिनिष्ठविषयतायाः आश्रयत्वस्य वह्नित्वे सत्त्वादतः तृतीयपर्याप्तिनिवेशः।

कूटानिवेशे महानसीयवह्नित्वावच्छिन्नाभाववदनुयोगिकसंबंधसामान्ये महानसीयवह्निप्रतियोगिकसंबंधमात्रवृत्तिवह्नित्वप्रतियोगिकत्व
वत्त्वाभावस्य सत्त्वादव्याप्तिरतः कूटमिति। गुरुधर्मस्येति प्रमेयधूमवान् वह्नेरित्यादौ विषयितातदन्यसंबंधयोः प्रतियोगित्वेनैकजातीयमिति स
ते कूटनिवेशपक्षमनतमाहुर्वस्तुत इति। ननु साध्यतावच्छेदकसमवायसंबंधसामान्ये तदवच्छिन्नप्रतियोगिकत्वयद्यदधिकरणानुयोगिकत्वोभया
भाववत्तदधिकरणानुयोगिकसाध्यतावच्छेदकसंबंधसामान्ये स्वविशिष्टप्रतियोगिकत्वाभाव इत्यादिः कल्पोऽस्त्वर्थः समवाये रूपमते द्रव्यं सत्त्वादि
सादौ द्रव्यत्वप्रतियोगिकसमवायेसामान्याद्यनुयोगिकत्वाभावस्यैव सत्त्वात् साध्यतावच्छेदकसंबंधानुयोगितासामान्ये तदवच्छिन्नप्रतियोगि
कत्वविशिष्टसंबंधनिरूपितत्वमद्यदधिकरणवृत्तित्वोभयाभावप्रवेशेऽपि तत्तदधिकरणानुयोगिकसमवायस्य स्वविशिष्टप्रतियोगिकतयाऽति
व्याप्तिरेव एवं च गुरुपर्याप्तिघटितपरिष्कारेऽप्यतिव्याप्तमिति मनसि कृत्य प्रकारान्तरेण तत्संगमयति येन रूपेणेति। यद्यपि तत्तदधिकरणवृत्ति
साध्यतावच्छेदकसंबंधानुयोगितासामान्ये स्वविशिष्टप्रतियोगिकसंबंधनिरूपितत्वाभावः यद्यदधिकरणे साध्यतावच्छेदकसंबंधसागे च सा
ध्यतावच्छेदकसंबंधानुयोगितासामान्ये तत्तदधिकरणवृत्तित्वस्वविशिष्टप्रतियोगित्वविशिष्टसंबंधनिरूपितत्वोभयाभावः प्रथमपक्षे विव
क्षितुं शक्यस्तथापि मतावलंबनेन यथाश्रुते निर्वाहादाशयास एवेत्युपेक्षितः। स्वरूपसंबंधेनेत्यादेर्घटत्वप्रमाविशेष्यत्वादिः। अत्र सामा
न्यधर्मावच्छिन्नातिरिक्ताधिकरणतानुपगमे वह्निमान् धूमादित्यादौ वह्निनिष्ठतत्तद्गुणादिरूपतत्तद्व्यक्तित्वेन तादृशतत्तद्वह्नित्वावच्छिन्नाभा

अवच्छे॰ ग॰टी॰ १० 10

वच्छेदसंबद्धस्वविशिष्टसामान्यकत्वसत्त्वात्साध्यतावच्छेदकताघटकसंबंधेन वह्नित्वावच्छिन्नाधिकरणतायां पारिभाषिकावच्छेदकताघ
टकसंबंधेन तदवच्छिन्नानिरूपितत्वात्सत्त्वेनाव्याप्तिः तादृशाधिकरणतात्वसामानाधिकरण्येन तदवच्छिन्ननिरूपितत्वाभावकूटप्रवेशे तु गौ
रवमित्यत आह अथवेति। अवृत्तित्वमपर्याप्तत्वं तेन वह्निरवृत्तिविषयतायां महानसीयवह्नित्वावृत्तित्वेपि न क्षतिः। कालिकसंबंधेन धूमत्वविशिष्ट
स्य धूमापर्याप्तविषयतावत्त्वादतिव्याप्तिरतः साध्यतेति। द्रव्यत्वाश्रये तदपर्याप्तविषयतावत्त्वात्स एव दोषः साध्येति। यद्यत्संबंधेन यद्यद्धर्मवि
शिष्टसामान्यं तादृशासंबद्धं तत्तत्संबंधेन तत्तद्धर्मावच्छिन्नविशेष्यतानिरूपितसाध्यतावच्छेदकताघटकसंबंधावच्छिन्नावच्छेदकताकविशेष्यता
वच्छेदकसाध्यतावच्छेदकधर्मवत्त्वमिति तर्कालंकारेणोक्तं गुरुत्वात्त्यक्तं। रीतिरेवेति। अवच्छेदकापर्याप्तविषयताश्रयत्वनिवेशे वह्नित्वेन तादृशा
मितिज्ञानकालेऽनुमितिवारणाय तद्धर्मितावच्छेदकतया वह्नित्वनिवेशं स्यात्तद्व्यवच्छेदायैवकारः। अन्यथेति। परिभाषानिरूपकतायां वाक्यव्या
हतत्वात्तज्ज्ञापकस्यैकपदस्यापत्तिः। प्रतियोगितावत्स्य पारिभाषिकत्वं विनैवोपपत्तिर्ज्ञायते अवच्छेदकपदमात्रं पारिभाषिकमित्याशयेनाह
यथेति। तादात्म्यसाध्यतावच्छेदकान्यतरसंबंधेनेति। गगनत्वस्यावच्छेदकत्वसंपत्तये तादात्म्यनिवेशः। सत्तात्वस्यावच्छेदकत्ववारणाय साध्यता
वच्छेदकसंबंधनिवेशः। तेन संबंधेन। तादात्म्यसाध्यतावच्छेदकान्यतरसंबंधेन। तादात्म्यनिवेशप्रयोजनं सत्तात्वस्यावच्छेदकत्ववारणरूपं वक्ष्यते व ग॰म॰
ह्निमान्धूमादित्यादौ घटत्वविशिष्टसंबंधिनि घटे साध्यतावच्छेदकसंबंधेन प्रतियोगिव्यधिकरणस्य तादृशो भूतलादौ तादात्म्यसंबंधेन तथाविध १०

स्य च घटाभावस्यासंभवात्साध्याभाविकावच्छेदकाप्रसिद्धिरतः द्वितीयसंबंधनिवेशः। ननूक्तनिरुक्तौ प्रतियोगितावच्छेदकसंबंधेन प्रतियोगि
वैयधिकरण्यस्य हेतुसमानाधिकरणाभावे सत्त्वात्सत्तादिसाध्यके व्याप्तिः सत्तात्वेन तादात्म्यसंबंधेन प्रतियोगिव्यधिकरणहेतुसमानाधिकर
णाभेदप्रतियोगितावच्छेदकत्वस्य तादात्म्येन पारिभाषिकावच्छेदकत्वस्य च सत्तादिसाध्यके साध्यतावच्छेदकसंबंधेन प्रतियोगिवैयधिकर
ण्येन तत्र प्रवेशस्य वारयितुं विशिष्टसत्तात्वादेरिति। अत्र विशिष्टसत्तात्वे सत्तात्वविशिष्टान्यापकतावच्छेदकत्वं नास्तीति तस्य हेतुव्यापकतावच्छेदक
त्वं प्रथमतः खंडितं। ननु साध्यतावच्छेदकसंबंधेन यादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणं स्वविशिष्टसंबंधि इत्यादिक्रमेणोक्तौ वह्नि
त्वविशिष्टसमवायिनि संयोगेन वृत्त्याभावस्य तथात्वादुक्तदोषतादवस्थ्यमत आह तथा च समवायीति। कालविशेषावच्छेदेनेति यत्पदेन समवायो
पादानादुपलक्षणतादृशावच्छेदकत्वज्ञकीलंकारमतमुपस्थापयन्निपरास्तमिति। प्रथमेति द्वितीयलक्षणप्रवेशस्य स्वविशिष्टसंबंधित्वोऽनिवेशात्। न
न्वेवमुत्तरकल्पानिर्भरेवाकाणसंगतिरित्यत आह वा कारइति। अवस्थितेति। व्यवस्थाकल्पयोर्विरुद्धत्वं तथा च परस्परावच्छेदकत्वानिवेश
र्थ विशिष्टपरस्परावच्छेदकत्वानिवेशार्थक र्थः। क्वचित्स्थले तदवच्छिन्नाभावे साध्यावच्छेदकत्वमेव क्वचित्स्थले स्वविशिष्टे साध्यावच्छेदकत्वमेव
निवेश्यमित्यर्थलाभार्थ इति यावत्। न तु पूर्वकल्पास्वरसपर इति भावः। प्रथमपरीक्षावच्छेदकत्वस्य कुत्रचिदुपयोगित्वं द्वितीयपरीक्षात इत्यस्य तु कुत्रचि
न्नदित्युक्तं दूषयितुमनुमितिसामान्यकारणीभूतज्ञानं विकल्पयति ईदृशेति। विकल्पकीति। कारणाव्यवहितोत्तरत्वनिवेशः सूचितः। तुल्यवि

अवय
ग॰टी॰
११

कल्पं दूषयित्वा अवस्थितविकल्पं दूषयितुमाशंकते न चेति। कालिकसंबंधेन घटादिसाध्यककालपरिमाणहेतुकानुमितित्वं न द्वितीय
निरुक्तावच्छेदकत्वाभाववज्ज्ञानकार्यतावच्छेदकं तथा सति कारणीभूतज्ञानस्य भ्रमत्वप्रसंगात्। समवायसंबंधेन जातिसाध्यकमेयत्वलिंग
कानुमितित्वं न प्रथमनिरुक्तावच्छेदकत्वाभाववज्ज्ञानकार्यतावच्छेदकं तत्कारणीभूतज्ञानस्य प्रमात्वप्रसंगादिति एवकारद्वयार्थः। अन्यत्र अ
न्यसाध्यसाधनस्थले। अन्यथा एकत्र सिद्धोपयोगजातीयसाध्यत्वोपयोगानुपगमे। अतिव्याप्तिः कारणीभूतज्ञानस्य प्रमात्वाव्यभिचारिता
तदंशविषयकज्ञानस्योपयोगसिद्धावपि अन्यत्र तदनुपयोगे बाधकाभावात्। तदंशविषयकहेतुसमानाधिकरणकेवलप्रतियोगिव्य
धिकरणाभावप्रतियोगितानवच्छेदकत्वज्ञानस्य सद्धेतावुपयोगो यथा मेयविशिष्टसत्तासाध्यकजात्यादिलिंगकानुमितौ तदनुपयोग
स्य वक्तुमशक्यत्वात् तथा च सद्धेतुलिंगकानुमित्यौपयिकव्याप्तिप्रतियोगितावच्छेदकावच्छिन्नत्वनिवेशासंगत्यापत्तिरिति भावः। एकसा
ध्यसाधनभावस्थले इति रीत्यंगीकारेपि तत्र प्रथमनिरुक्तावच्छेदकत्वाभावज्ञानहेतुत्वस्यावश्यकतामाह मेयत्वेति। तथा च समवाय
संबंधावच्छिन्नवृत्तिशून्यगगनादिमात्रवृत्तिधर्ममादाय प्रथमनिरुक्तावच्छेदकत्वाभावज्ञानमेव तदानीमनुमित्युपपादकतया स्थेयम
मिति भावः। उररीकृतकारणतावच्छेदकचरमनिरुक्तावच्छेदकत्वाभाववज्ज्ञानासंभवेन तत्रानुमितिस्यपलायोगीक्रियतइति वक्तुं न शक्यते इत्य
भिप्रेत्य दृष्टांतानुसरणं तथा सति प्रतियोग्यनधिकरणहेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वज्ञानासंभवस्थले कालो घटवा

राम॰
११

नित्साध्यनुमित्सयलाघवसापि तु वचनं योभयाभावादिघटितनिरूपणामुद्रांतकस्मिंस्तत्वप्रसंगः इतिभावः ॥ दीधितिकृतासाध्यतावच्छेदकसं
वंधेनसंवंधित्वनिवेशोपि स्वपंतसरित्यपकालोपव्टवानिसादौ स्वरूपसंवंधेनगगनादेर्वृत्तिमत्वेपि प्रतियोगिताधर्मिकोभयाभावघ
टितकस्यानादरं ध्वनयपत्रे व समाधत्तेइदंत्विति ॥ येनसंवंधेनेत्सनेनतादात्म्यादिसंवंधस्तु पादायकालोपव्टवानिसादौ लक्षणासंगतिः ॥ ए
वमग्रेपि ॥ यद्रूपेति वह्निद्व्यणुकवान् एतत्वादित्सादौ रूपसामान्याभावप्रतियोगितावच्छेदकस्य वह्निद्व्यणुकसमवायिनिष्ठाभावप्रति
योगितानवच्छेदकत्वेपि वह्निद्व्यणुकसंयोगिनस्तत्समवायिभिन्नत्वाल्लक्षणासंगमनं द्रष्टव्यं ॥ संयोगादीति ॥ स्वविशिष्टसंवंधितावच्छेद
कसंवंधसामान्येयादृशप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिकत्वस्वविशिष्टसंवंधियत्किंचिदनुयोगिकत्वोभयाभावस्तादृशप्र
तियोगितेत्सादि वह्निमान्धूमादौ सामान्यांतर्गतमहानसीयवह्निसंयोगादौ महानसीयवह्नित्वावच्छिन्नत्वस्वविशिष्टसंवंध्यनुयोगिकत्वोभ
यसत्वादव्याप्तिरतः यत्किंचिदिति ॥ प्रतियोगिवैयधिकरण्येसाध्यतावच्छेदकसंवंधनिवेशं तर्कालंकारोक्तं निराकरोति साध्यतेति ॥ अत्रोभ
याभावाकरणे प्रतियोग्यनधिकरणवृत्तित्वद्रूपतत्निवेशेवह्नित्वादेः पारिभाषिकावच्छेदकत्वापसाद्व्याप्तिरस्त्येवपरं तु पूर्वोक्तसंवंधसामा
न्येनप्रतियोगिवैयधिकरण्यप्रवेशोपि नत्विपमिति हेतुसमानाधिकरणाभावेषु भयाभावोननिविष्टइतिवाविशेषः ॥ घटादेः साध्यत्वेस्व
दाहौतत्संवंधित्वसत्वेनतत्रातीतव्यत्वाद्यभावसोलभ्येननावच्छेदकत्वानुपपत्तिरतः सर्वत्वानिति ॥ निस्पत्वेतितत्संवंधेनतद्धर्मसंवंधित्व

अव छे॰
ग॰ टी॰
१२
12

विशिष्टप्रतियोगिकत्वविशिष्टसंबंधत्वद्वयमित्यपि इति नियमे विषयितान्यत्वनिवेशमभिप्रेत्य नहि एतदर्थं तत्पातन्न तन्निवेश आवश्यक इत्याशयेन तदनि
वेशेप्यव्याप्तिं निराकरोति तत्रेति। सर्वमिति स्वविशिष्टं अवच्छेदकतयोरेकसंबंधावच्छिन्नत्वं। संबंधित्वे साध्यतावच्छेदकाद्युभयावच्छेसंबंधः
कुतो न निवेश्यत इत्याशंकायां तत्र दूषणं च प्रागुक्तमित्यर्थः। लाघवादाह पदद्वयेति। तद्द्वयमित्यस्यैकलक्षणं साध्यसंबंधानुयोग्यनुयोगिकसं
बंधेन तथाविधप्रतियोगिकत्ववत्त्वलक्षणं तत्पर्यायाः संबंधत्वमपादाहतद्वदिति। साध्यतावच्छेदकसंबंधिपदार्थैकदेशसंबंधेतद्वत्ता
न्वया तथाविधप्रतियोगिकत्ववत्संबंधानुयोग्यनुयोगिकसंबंधप्रतियोगित्वमर्थः। दिगर्थस्तु गुरुधर्मेऽभावप्रतियोगितावच्छेदकत्वस्यानिर्दि
तत्वेपि संबंधप्रतियोगितावच्छेदकत्वमुपगम्यते प्रतियोगिवैयधिकरण्ये साध्यतावच्छेदकसंबंधोपेक्षा च पूर्ववत्। एवमसंबंधीत्यत्र संबंधा
पयत्नद्धेदकूर्रवोध्यं तेन गुरुत्वमेयधूमत्वावच्छिन्नसंबंधित्वावच्छिन्नभेदास्त्वेपि न क्षतिरित्यपमेविशिष्टैकार्थरूपतां दर्शयति। तथा चेति।
अग्रेइति द्वितीयावच्छेदकत्वलक्षणे तदनिर्भरस्य प्रदर्शितत्वात्। तदसमानेति। हेतुसमानाधिकरणाभावे संबंधसामान्येन प्रतियोगिवैयधिक
रण्ये कौतुमहाकालो घटवानित्यादौ तादृशाभावाप्रसिद्धिरिष्टव्या। प्रतियोगितावच्छेदकसंबंधेनेत्यादि वह्निमान्धूमादित्यादौ वह्नित्वविशिष्टसं
बंधिनिष्ठाभावीयदंडादिनिष्ठप्रतियोगितायां घटत्वावच्छेदघटत्वसंयोगसंबंधावच्छिन्नत्वोभयाभावसत्त्वाद्धेतुसमानाधिकरणाभावप्रतियोगितासा
मान्यांतर्गतघटनिष्ठप्रतियोगितायां तदसत्त्वेनाव्याप्तिः सामान्यत्वमवच्छेदकत्वघटकप्रतियोगिताविशेषणं एवं च घटनिष्ठप्रतियोगितायां

अपि सामान्यान्तर्गततया तत्र पदार्थपदेन घटत्वमुपादायोभयाभावासंभवेपि साध्यतावच्छेदकं तदवच्छिन्नव्यापकतावच्छेदकमन्यद्वोपा
दायोभयाभावः संभवतीति तन्नाव्याप्तिः। धूमवान्वह्नेरित्यादौ गगनावच्छेद्यत्वसंयोगसंबंधावच्छिन्नत्वोभयाभावस्य धूमत्वविशिष्टसंबंधिनिष्ठा
भावप्रतियोगितासामान्यनिष्ठस्य वह्निसमानाधिकरणाभावप्रतियोगितासामान्ये सत्त्वादतिव्याप्तिः यद्यदितिवीप्सा तथा सति धूमत्वस्यापि यद्य
दर्थान्तर्गतत्वान्न दोषः। पदार्थसंबंधेति। संबंधवीप्सापाठो नास्त्येव तत्प्रयोजनाभावश्च। एवं वस्तुतस्त्वित्यग्रिमकल्पे सामान्यपदप्रयोजनं प्रतियो
गितावच्छेदकसंबंधेन प्रतियोगितावच्छेदकावच्छिन्नत्वे वैयधिकरण्यनिवेशप्रयोजनं तुल्यं। साधारणत्वादिति। तथा च द्वितीयावच्छेदकघटिते
प्रतियोगिताधर्मिकोभयाभावघटिते च लक्षणे संभवतीति भावः। तद्रूपावच्छिन्नत्वसाध्यतावच्छेदकसंबंधावच्छिन्नत्वोभयाभाव इति। न च धूम
वान्वह्नेरित्यादौ गगनत्वावच्छेद्यत्वसंयोगसंबंधावच्छिन्नत्वोभयाभावमादायातिव्याप्तिरिति वाच्यं। तस्योक्तवीप्साघटितोभयाभावकूटघटिता
तः प्रतियोगितावच्छेदकत्वावच्छिन्नभेदरूपस्येति। प्रतियोगितावच्छेदकप्रतियोगिकभेदनिवेशो दोषरुत्थः। अनवच्छेदकत्वादीत्यादिना प्र
तियोगितावच्छिन्नभेदादिनिवेशौपयिकदोषपरिग्रहः। समवधारणनानाधर्मीरूपस्यादिः। घटत्वज्ञत्वरूपप्रागभावरूपध्वंसादिचौ। जगदीशेन घट
त्वादिनिष्ठावच्छेदकतानामेव विशिष्य भेदप्रतियोगितावच्छेदकत्वमुक्तं तत्रापि गौरवान्नतस्य रीत्यागत्या आर्थं तत्तद्व्यक्तित्वेनैव स्वेषकाः। यथा चैकस्या
मेव व्याप्तौ कासांचित्प्रतियोगितानां केषांचिदवच्छेदकानां च विशिष्य निवेशेन प्रतियोगितावच्छेदकभेदकूटो निवेश्यः। एवं कासांचित्प्रतियोगिता

अवच्छे
ग॰टी॰
१२
13

नामेवनिवेशेनतदवच्छिन्नभेदकूटोनिवेशपइत्याहएवमिति।एकेतिसंबंधभेदाभावेनावच्छेदकैक्येबाधकाभावात्।अवच्छेदकभेदनिवेशा(
संभवेनकास्यांचिदवच्छेदकतापर्याप्तौनानिवेशइत्याहएवमितिऽतत्प्रतियोगितावच्छेदकतात्वेनचेति।स्वावच्छेदकतापर्याप्तिसंबंधेनतत्प्र
तियोगितावच्छिन्नभेदनिवेशोनसंभवतिप्रतियोगितायाअव्याप्यवृत्तित्वात्योयदीयेत्यादिसामान्यनियमेतथादृष्टमितिचेदेवमपिप्रतियो
गितानिवेशोपपत्तेः तत्रानापत्त्याद्वृत्त्यनियामकसंबंधावच्छिन्नाभावांगीकारेपीहन्नमातांनतथाभिप्रायइतितुआशयः।आकाशाभाववह्निमदन्यत
रत्वादेरितिआकाशाभाववह्निमदन्यतरत्वस्यतत्ताभावीयसंयोगसंबंधावच्छिन्नप्रतियोगितावच्छेदकत्वचारणयाकाशाभावांतर्भावः।एवंच
तत्त्वलाघवेनाभाववह्निमदन्यतरत्वमेवतादृशसंबंधावच्छिन्नाभावप्रतियोगितावच्छेदकंनत्वाकाशाभाववह्निमदन्यतरत्वंअतएवाग्रेधूम
वान्वह्नेरित्यादावतिव्याप्तिमेवशंकिष्यतिनासंभवं।दुर्वारत्वेवेति।विषयितासंबंधावच्छिन्नतत्प्रतियोगिताव्यापकेअभाववह्निमदन्यतरत्वेतत्प्र
तियोगितावच्छेदकत्वंनसंभवतिअभाववह्निमदन्यतरत्वावच्छिन्नविषयकज्ञानेतत्प्रतियोगिताकाभाववत्तिविषयितासंबंधेनतदवच्छिन्न
भेदसत्त्वेनस्वनिरूपकीभूताभावविरोधितावच्छेदकत्वासंभवादितिभावः।नन्वन्यतरत्वस्यभेदप्रतियोगितावच्छेदकीभूतभेदप्रतियोगिता राम॰
वच्छेदकरूपतामतेतत्प्रतियोगितान्यूनवृत्त्यपितादृशाभावस्याकाशाभावत्वंवह्निमत्त्वंवाऽवच्छेदकमस्त्वित्यतआहतदुभयेति।अन्यतरत्वाव १२
च्छिन्नाभावसत्त्वादितितथाचाकाशाभाववत्वादेःस्वतत्तन्निरूपकीभूताभाववद्वृत्तितावच्छेदकत्वेपिअन्यतरत्वेनतद्विरोधितावच्छेदकत्वम

ख्यातमेवेति भावः। अभाववत्वेति आकाशाभाववत्वेत्यर्थः तदुभयेत्युपक्रमानुरोधात् तादृशितप्रयोजनानुरोधेनेति। धूमवान् वह्नेरित्यादौ कालिकसंबंधे
न धूमसंबंधिनि इष्टसंयोगावच्छिन्नाभावप्रतियोगितानवच्छेदकद्रव्याभावत्वाद्यवच्छेद्यत्वाभावस्य वह्निसमानाधिकरणाभावप्रतियोगिता
सामान्ये सत्त्वादतिव्याप्तेर्निराकरणात् एतत्प्रयोजनं प्राक् प्रदर्शितं। द्वितीयावच्छेदकलक्षणे चेत्यादिः। तत्र प्रयोजनाभावेन प्रतियोगितायां संबंध
स्यैवानिवेशान्नन्वेतत्तृतीयनीनां यद्यपि द्वितीयावच्छेदकत्वलक्षणे आयातं तत्र एवं तद्वितयं पपादितं तथा विप्रमिथ्यादिरीतिः साध्यतावच्छेदकसंबंधेन
साध्यवति तत्संबंधेन पारिभाषिकावच्छेदकविशिष्टवह्नेरासत्त्वं तत्त्वशरीरे न साध्यतावच्छेदकसंबंधेन संबंधित्वप्रवेशं विनेति मेन संबंधेनेत्यत्र
पक्षे न साध्यतावच्छेदकसंबंधो ग्राह्यः इत्यभिप्रायान्न दोषः। तृतीयलक्षणे तु यथादितमेवाग्रे ग्रंथकारेण। कालः सर्वेवानित्यादावव्याप्तेर्यथा
श्रुतमेवेति। अवच्छेदकाप्रसिद्धेरिति। पर्वते तु मत्त्रिष्ठाभावप्रतियोगितावच्छेदकं धूमत्वादित्तत्स्वविशिष्टव्यापकतावच्छेदकं पक्षतादृशं घटा
प्र भावत्वादि तत्र हेतुमत्रिष्ठाभावं प्रतियोगितावच्छेदकमिति भावः। अनतिरिक्तवृत्तित्वस्येति लक्षणत्रयेपि दोषं वक्तुं सामान्यतोऽभिधानं। द
व्यत्वादेरपीति। नन्वेतावता धूमवान् वह्नेरित्यादौ कथमतिव्याप्तिः साध्यतावच्छेदकसंबंधेन प्रतियोगितावच्छेदकसामान्यावच्छिन्नानधिक
रणत्वस्योक्तत्वात् आद्यलक्षणदूषणे प्रतियोगिव्यधिकरणाभावाप्रसिद्धेः। न च प्रतियोगितावच्छेदकसंबंधेन तद्विलक्षणीयं वस्त्वभावानधिकरणं
चायोगोलकादिकमेवेति तृतीयलक्षणातिप्रसक्तिप्रसक्तिरिति वाच्यं। वस्त्वभावत्वरूपप्रतियोगितावच्छेदकीभूतद्वयाभावव वस्त्वभावान्यतरत्वाव

अवच्छे
ग०टी०
१४
१५

च्छिन्नाधिकरणत्वस्यायोगोलके सत्त्वात्तान्नचैतल्लक्षणेषु वह्निमान्धूमादित्यादौ घटात्मकप्रतियोगितावच्छेदकीभूतद्रव्यत्वावच्छिन्नानधिक
रणत्वस्य हेतुमन्यसत्त्वादव्याप्तिरतो व्यतिरेकिमयत्र प्रतियोगितावच्छेदकसामान्ये साध्यतावच्छेदकसंबंधेन यत्किंचिद्धेतुमद्वृत्तितावच्छेदक
त्वाभाव इत्यर्थो विवक्षितः । वह्नित्वावच्छिन्नप्रतियोगितावच्छेदकस्य महानसीयवह्नित्वादेः यत्किंचिद्धेतुमद्वृत्तितानवच्छेदकत्वादव्याप्तेः सा
मान्यपदं व्यापकत्वार्थकं व्यतिरेकित्वं मेयत्वादिवारणाय तथा च घटाभावादिरूपप्रतियोगितावच्छेदकस्य सर्वस्यापि तथात्वाल्लक्षणसम
न्वयः । एवं च वन्ह्यभावादिस्वरूपप्रतियोगितावच्छेदकमादायातिव्याप्तिसंगतिरिति वाच्यं । एवमपि तृतीयलक्षणोक्तालोचघटवान्निसादेः सं
ग्रहाय प्रतियोगितावच्छेदकसंबंधेन प्रतियोगिवैयधिकरणप्रनिवेशात्तत्र प्रतियोगितावच्छेदकावच्छिन्नत्वघटितपरिष्काराणामसंजस्यायाता
त्तथाहि प्रतियोगितावच्छेदकसामान्यं प्रतियोगितावच्छेदकसंबंधेन हेतुमद्यत्किंचिद्वृत्तितानवच्छेदकमित्यत्र समवायाद्यवच्छिन्नघटाद्य
भावादिरव्याप्तिकर एव तत्प्रतियोगितावच्छेदकीभूतसत्तावच्छिन्नस्य समवायेन सत्त्वात् एवं द्रव्यत्वादिपि द्रव्यत्वाभावादिस्वरूपप्रतियोगिता
वच्छेदकद्रव्यत्वाभावगुणत्वाभावान्यतरत्वावच्छिन्नस्य सत्त्वात् मैवं । साध्यतावच्छेदकसंबंधघटितप्रतियोगिवैयधिकरण्यघटितलक्षणयोरप एम० १४
रिष्कृतयोर्दीर्घाभिधानस्य दुर्वचतया तत्परिष्कारेणैवातिव्याप्त्यभिधानं तृतीयलक्षणपरिष्कारैक्यमात्रेरूपलक्षकमिति किमनुपपन्नं । अथ
प्रतियोगितावच्छेदकसंबंधेन पादस्य प्रतियोगितावच्छेदकसामान्याश्रयानधिकरणमित्यादितृतीयलक्षणे विषयितासंबंधावच्छिन्नघटाभा

वादिरेवच्छेदक इति चेत्। विषयिताया ह्यस्य नियामकत्वात्तत्संबंधावच्छिन्नाभावानुपपत्तेः अन्यथा पूर्वलक्षणे विषयितासंबंधावच्छिन्नवन्न्य
भाववद्व्याप्यत्वाभावीयवन्न्यभावरूपप्रतियोगितावच्छेदकतायास्तादृशान्यतरत्वेऽसत्त्वेन तथाविधावच्छेदकत्वाभावे यत्प्रतियोगितावच्छेदक
सामान्यनिष्ठत्वाप्रसिद्ध्याऽतिव्याप्त्यभावेऽपि तादृशसंबंधावच्छिन्नघटाभाववद्व्याप्यत्वाभावीयघटाभावरूपप्रतियोगितावच्छेदके तादृशमव
च्छेदकत्वाभावात्तत्त्वेनाप्रसिद्ध्याऽव्याप्तेर्दुर्वारत्वात्। केचित्तु साध्यतावच्छेदकसंबंधसामान्ये यादृशप्रतियोगितावच्छेदकविशिष्टावच्छि
न्नप्रतियोगिकत्वहेतुमद्यत्किंचिदनुयोगिकत्वोभयाभाववद्वसादिरीत्या परिष्कुर्वंतीयां तत्राभावप्रतियोगितावच्छेदकत्वविशिष्टावच्छिन्न
प्रतियोगिकत्वं च विषयितासंबंध एवोपेयः तेन संयोगादेस्तत्त्वलाघवेन द्रव्यत्वस्यैवावच्छेदकत्वोपगमादिसाङ्गः। यादृशरूपेति। प्रतियोगिनिष्ठा
याया यादृशरूपावच्छेद्यता तन्निरूपकधर्मेत्यर्थः तद्रूपेति। तद्रूपावच्छेद्यतानिरूपकत्वपर्याप्त्यनधिकरणत्वमर्थः। यद्रूपेति। तत्र महानसीय
वह्न्याऽदिरिति प्रतियोगितात्वमेव न तु वह्निरिति प्रतियोगितात्वात् एतद्रूपान्यत्वे निरूपसमवेतत्वस्य साध्यव्यापकतावच्छेदकत्वाद्दोषइत्येतत्स
दं। तदन्यत्वेति दीधितिसंगमपि तु माहये नेति। यद्यपि कालिकसंबंधावच्छिन्नाधेयतावृत्तेः विधेयमप्रसिद्धं तथापि तदन्यद्यत्किंचित्संबंधावच्छि
न्नाधेयतावृत्तित्वेनादृष्टरूपेण तत्संबंधावच्छिन्नाधेयतावृत्तित्वविधेयसंभवत्येवमेनयेन तेन तेनेति वीप्सापादृत्सव्ययुक्तः एवमप्रसेकं तत्संबंधावच्छिन्नाधे
यतावृत्तित्वेनादृष्टरूपेणासेकं तत्संबंधावच्छिन्नाधेयतावृत्तित्वविधेयान्वयोपगमे कालिकसंबंधमादायोक्तदोषतादवस्थ्यात्। तत्तत्संबंधावच्छिन्नाधे

अवच्छे
ग०टी०
१५
15

यत्ताकूटवद्भाववद्वृत्तित्वेऽपि तादृशाधेयताकूटवद्भाववद्वृत्तित्वविधेयान्वयेच वैयर्थ्यात्। एतच्च तदन्यत्वे इति दीधितिसंगमयितुमेव विशेषणानां विशे
षणनिवेशे न तदसंगतेः तदन्यत्वप्रकारके इति दीधितिमात्रोच्चटतस्य रित्यन्याहुरुभयत्रेति। प्रपाठे तेति व्यभिचारनिरूपकाधिकरणान्यत्वाद्यभावमा
दायातिव्याप्तिनिराकरणात् तत्प्रलये गगनत्वमिश्रोहापत्त्येति। विशेषस्य स्वरूपत एव प्रतियोगितावच्छेदकत्वं तत्रासाधारणधर्माभावात्। प
र्वतमहानसादीनां तु तत्तद्विशिष्टानामेवेति सूचनायां स्वपदं। आश्विति। धूमाभावो धूमसमानाधिकरणः इति ज्ञानं वह्निमवत्ताप्रकारकप्रमाविषय
त्वाभावो धूमसमानाधिकरण इति ज्ञानमप्याहार्यं धूमवत्ताप्रकारकत्वाना विषयत्वस्य धूमाभावरूपत्वात् धूमव्यावर्तकधर्मरूपत्वाद्वा एवं
चाहार्यस्याप्रतिबंधकतया न तद्धि रहकृतो विलंबः। दर्शितरीतिरिति। येन संबंधेन स्वविशिष्टसंबंधीत्यादिरीत्यर्थः। दर्शितस्य लेकालोच
रत्वानित्यादेः। न तु दीधितिकृतामेव दशलाघवालोचनं नास्ति सत्त्वाह वक्ष्यते चेति। अतिव्याप्तिवारणाया वच्छेद्यत्वाभावकूटनिवेशः न च
तादृशकूटवह्निर्मावच्छेद्यत्वसामान्याभाव एवास्तु। यद्यपि निर्विशेषितहृदभेदत्वायोगोलकभेदत्वाद्यवच्छेद्यतानां किंचिद्विशेषितधर्मनिरूपि
तावच्छेद्यतात्वेन नानुगमसंभवः तथापि तादृशावच्छेद्यतासामान्याभाव एव निवेश्य इति चेन्न। अयोगोलकभेदादिप्रतियोगितायां तत्सत्त्वे राम०
नातिव्याप्तेः। वह्निमति हृदभेदसत्त्वेन तादृशधर्मविशिष्टाभावासत्त्वादिति। आरुह्येत्यस्वरसः तद्वीजं तु स्वविशिष्टसंबंधिनिष्ठाभावीयायाः प्रतियो १५
गितायास्तदवच्छेदकधर्मावच्छेद्यत्वाभावकूटवदन्यत्वस्य हेतुसमानाधिकरणाभावप्रतियोगितायां निवेशात् प्रमेयधूमवान् वह्नेः वह्निमान् धूमादि

सारेण न दोषः। अथ वा सकलतत्तत्प्रतियोगितावच्छेदकावच्छेद्यताभावानुगमकेन किंचिद्रूपेणानादृशप्रतियोगितानिष्ठाभावप्रतियोगिता
नवच्छेदकत्वनिवेशः तथापि तादृशावच्छेद्यताभावकूटनिवेशापेक्षया लाघवात् अत एव स्वयमीदृशकल्पस्योपपन्नत्वं निश्चित्य तत्सारेणमू
लानुरोधेन पूर्वं बीजमवादीदिति। केवलान्वयिसाध्यकहेतुसमानाधिकरणाद्यत्यादिद्वित्वविशिष्टगगनाद्यभावप्रतियोगितापायदिग
गनाभाववत्त्वं नावच्छेदकं तदालक्षणासमन्वयापत्तेरिति अन्यथा त्वसंभवः। धूमवतीति क्वचिद्भवति वह्न्यभाववन्मदशायां व्यभिचा
रज्ञानसत्त्वेऽपि प्रमेयवह्नित्वं गौरवान्न तदनवच्छेदकमिति ज्ञानकालेऽसत्यर्थः। यत्र साध्ये सत्तीति व्यधिकरणस्य समीचमपि वेसाहपद्रूपेति। गौ
रवेति। व्यभिचारलिंगकव्याप्तिज्ञानस्य न साध्यतावच्छेदकधर्मिकस्वरूपसंबंधरूपत्वादृशावच्छेदकताभावस्य विषयत्वसंभवः प्रमात्वा
पत्तेः। तस्य व्यापकतावच्छेदकतानात्मकत्वाच्च। नापि स्वरूपसंबंधरूपयद्धर्मावच्छेद्यताभावस्य गौरवप्रयुक्तानवच्छेदकताग्रहे प्राप
तिबंधादिति भावः। तदवच्छिन्नाभावे साध्यादिकस्य हृदये व्याप्तिज्ञानस्य भ्रमत्वसंभवात् तद्भावर्त्तयति। अवच्छेद्यताभाववद्धर्मिकव्याप्तिपक्षे रति।
तदेति सिद्धोपयोगज्ञानीयत्वादिति भावः। अस्तु तत्ताभावप्रतियोगितावच्छेदकसाध्यतावच्छेदक एव स्वरूपसंबंधरूपावच्छेद्यताभावस्य का
रणत्वान्नोक्तदोषः इत्यत आह एवमिति। स्वरूपसंबंधरूपतदवच्छेद्यताभावस्य दुर्ग्रहत्वया महानसीयवह्नित्वाद्यवच्छिन्नसाध्यकानुमितिप्र
संगः इति पाठः तत्र महानसीयवह्नित्वाद्यवच्छेद्यत्वस्य विषयितासंबंधावच्छिन्नप्रतियोगितायाः सुग्रहत्वया तदभावस्य दुर्ग्रहत्वेति। हेतो त

अवृद्धि
ग॰टी॰
१६
16

द्वच्छिन्नव्यापकतावच्छेदकावच्छिन्नाभावसामानाधिकरण्यग्रहेऽपि महानसीयवह्नित्वाद्यवच्छिन्नसाध्यकानुमितिप्रसंग इति पाठ आदर
णीयः। उक्तव्यभिचारग्रहस्य पारिभाषिकावच्छेद्यत्वाभावग्रह एव विशेषितपास्वरूपसंबंधरूपतदवच्छेद्यत्वाभावग्रहसंभवादिति
भावः। इदानीं स्वरूपसंबंधरूपावच्छेद्यत्वाभावघटितस्य व्यापकतावच्छेदकतानात्मकत्वं व्यवस्थापयति वस्तुत इति। इदं तु बोध्यं महा
नसावृत्तिद्रव्यवान् धूमादित्यादौ महानसावृत्तिद्रव्यत्वे धूमीयस्वरूपसंबंधरूपावच्छेद्यत्वाभावघटितवस्तुसंपादनेपुनरुक्तजातिमान्
मेयत्वादित्यादौ जातित्वे मेयत्वीयतत्संपादनात्। साध्यतावच्छेदकरूपसंबंधादेरेव भेदाज्ञानमचतुर्थे नानुमित्सायति[illegible]मिहिताने नानु
तस्य व्यापकतावच्छेदकतानात्मकत्वमिति भेदः इति वा। उभयपक्षेऽप्येकत्रैव वस्तुवचनात्। यदि च धूमहेतुकव्यभिचारप्रतियोगिसद्भा
वात् तत्रैव धूमीयसाध्यतावच्छेदकसंबंधघटिततद्वस्तुनो व्यभिचारप्रतियोगितानवच्छेदकमात्रनिष्ठत्वाभावेन व्यापकतावच्छेदकत्वनि
राकरणं पुनर्मेयत्वीयजातिदशातद्वस्तुमत्त्वहेतुकाव्यभिचारप्रतियोग्यप्रसिद्धेस्तत्र तन्निराकरणसंभवादित्युच्यते तदापि महानसावृ
त्तिद्रव्यसाध्यकधूमे तस्य व्याप्तित्वाभिमानवादिनः प्रति अनुमित्सापनेरपि तु वचनपाप्रथ[illegible]मग्रंथाधिकं दुर्वारं। एवं सति कुशकाशा एम॰
वलंबनेन यत्किंचित्तात्पर्योपवर्णनं तु न शरणम् इति। न चैतादृशप्रयुक्तिव्यापकतावच्छेदकतानात्मकत्वसाधिके साध्यांकायमाहावच्छे १६
दकत्वाभावेति। इत्यादिकमिति यथाश्रुतधर्मावच्छिन्नसाध्यके सद्धेतौ पारिभाषिकावच्छेद्यत्वाभावघटितालघुधर्मावच्छिन्नसाध्यके तत्र

स्वरूपसंबंधरूपावच्छेद्यत्वाभाववद्वृत्तित्वाभिमतत्वे च गुरुधर्मावच्छिन्नसाध्यके व्यभिचारित्वपारिभाषिकावच्छेद्यत्वाभाववद्वृत्तित्वाप्रसि
भ्रमो लघुधर्मावच्छिन्नसाध्यके तत्र स्वरूपसंबंधरूपावच्छेद्यत्वाभाववद्वृत्तित्वाप्रसिद्ध्या भ्रम इति नियमोऽपि न संभवति धूमवान्वह्नेरित्यादौ पा
रिभाषिकावच्छेद्यत्वाभाववद्वृत्तित्वाभावेऽप्यनुमितिसंगतत्वानुभवात् स्वरूपसंबंधरूपावच्छेद्यत्वाभाववद्वृत्तित्वस्य व्यापकतावच्छेदकत्वानात्मक
तयाऽनुमित्संगतत्वाबाधाच्चेति एतदर्थमेवादिपदं विरोधिता प्रसंगेनेति। अत्र वदंति नेदृश्यावर्त्तकधर्मदर्शनविषयाप्रतिबंधकताया
पादपि तु शंकाते न च्चेऽपि तत्स्वीकारात् तर्किं तु मतिर्मंत्राद्विन्यायेन कंबुग्रीवादिमत्त्वादिधर्मिकसंसर्गविषयातज्जन्यत्वप्रतियोगितावच्छेद
कताग्रहं प्रति तज्जन्यत्वप्रतियोगितावच्छेदकघटत्वाद्यपेक्षया गुरुत्वज्ञानत्वेन विरोधित्वं गोत्वज्ञानघटन्यकाले तु कंबुग्रीवादिमान्नास्तीति
प्रतीतिर्भ्रमरूपैव अन्यथा गुरुत्वस्यावच्छेदकताया अव्यावर्त्तकतापत्त्या तज्ज्ञानप्रतिबंधकत्वमेव निर्युक्तिकं स्यादिति प्राचामाशयः
वस्तुतस्तु गोत्वज्ञानकालीनेत्याद्यनुपदमभिधानात् उक्तगुरुत्वज्ञानप्रतिबंधकताया अप्रसिद्धिरेवाभिप्रेता गोत्वस्यावच्छेदकताव्या
वर्त्तकत्वोपगमोक्तिश्च प्रतीतेः प्रमात्वसंजयितुमेवेति गुरोरवच्छेदकत्वसिद्धौ बाधकाभावः इति बोध्यं। द्विविधस्यापि भ्रमत्वस्याप्रसक्तेः प्रमा
त्वं दुर्वारमित्याशंकते नचेति भ्रमताभावरूपं प्रमात्वं न वस्तुसाधकं निर्विकल्पकसाधारण्यात् किं त्वप्रमादृशं तच्च सविवादमेवेत्याह प्रमात्व
स्यापीति। भ्रमत्वमप्युपपादयन्निवक्ति तस्मिन्निति। कंबुग्रीवादिमत्त्वे इति। येन संबंधेन संबंधित्वं तेन संबंधेन प्रतियोगिवैयधिकरण्यं तेन प्रमेयगग

अव॰ छे॰
नि॰ टी॰
७८
17

नाद्यभावस्थले संबंधप्रसिद्धिः। स्वविशिष्टनिष्ठभेदप्रतियोगितानवच्छेदकत्वघटितसंबंधनिवेशे प्रमेयसत्ताभावे विशिष्टसत्तात्वावच्छिन्न
प्रतियोगितायाः संबंधघटकत्वोपपत्तिः। न च स्वावच्छेदकावच्छेद्यावृत्तितद्विशिष्टसमानाधिकरणाभावप्रतियोगितात्वकतासुप्रतियोगि प
तावत्त्वमेवाभावे तद्विशिष्टसंबंधः स्वघटकसामान्याभावप्रतियोगितावत्त्वं चानंतप्रतियोगितानां न विशिष्य निवेशप्रसंग इत्यत आह गोत्वा
दिति। यथाश्रुतेप्येतद्दूषणानवकाशो द्रष्टव्यः। अत्रैवेति गुरुत्वावच्छेदकत्व एवेत्यर्थः। पारिभाषिकेति। हेतुसमानाधिकरणाभावप्रतियोगितावच्छे
दकतात्वपर्याप्तितद्विशिष्टसंबंधविशिष्टाभावप्रतियोगितानवच्छेदकत्वं निवेश्यमित्यर्थः। स्वपदेनेति। तथा च दीधितिकृतां स्वत्वनिवेशनिबंधना
ननुगमाभिधानासंगतिरिति भावः। एतेन व्यभिचारज्ञानरूपप्रतियोगिनोऽनुमितिविरोधित्वासंभवेन। अत्र व्यभिचारशरीरे तत्तत्प्रतियोगिता
नामानंत्येऽपि तावन्मात्रवृत्तिधर्मकिंचिदेकरूपेण कथंचित्तानमुपपाद्याभावसत्त्वोपपत्तिश्चेदुच्यते तदाप्याह इदमिति। बाधेति। न च पक्षे ज्ञाए
यात्यगुणव्यापकतावच्छेदकावच्छिन्नाभाववत्त्वेन बाधः तत्र साध्यतावच्छेदकावच्छिन्नवत्ताज्ञानाविरोधित्वात्तद्दोषलक्षणे साध्यव्यापकता
वच्छेदकावच्छिन्नावगाहितानप्रवेशशंका तथा सति ह्रदो वह्निमान्निसादो ह्रदोऽवावानवह्निआप्यधूमवांश्चेत्यनुमितेऽविरुद्धत्वापातादिति॥ ए॰ म॰
॥ ॥ इत्यारडोपाह्वकृष्णभट्टविनिर्मिता अवच्छेदकत्वतत्त्वविवृत्तिः॥ ६९ ॥ ६९ ॥ श्रीगुरुगोविंद ॐ सूर्य्यगणेशमहालक्ष्मीशिवविष्णवे ७८